ताम्रोष्ठं विंशतिभुजं महास्यं दीप्तमूर्धजम्। तस्मिन् जाते ततस्तस्मिन् सज्वालाकवलाः शिवाः। क्रव्यादाश्चापसव्यानि मण्डलानि प्रचक्रमुः। ववर्ष रुधिरं देवो मेघाश्च खरनिःस्वनाः। प्रबभौ न च सूर्योऽपि महोल्काश्चापतन् भुवि। चकम्पे जगती चैव ववुर्वाताः सुदारुणाः। अक्षोभ्यः क्षुभितश्चैव समुद्रः सरितां पतिः। अथ नामाकरोत् तस्य पितामहसमः पिता। दशग्रीवः प्रसूतोऽयं दशग्रीवो भविष्यति। तस्य त्वनन्तरं जातः कुम्भकर्णो महाबलः। प्रमाणाद्यस्य विपुलं प्रमाणं नेह विद्यते। ततः शूर्पणखा नाम संजज्ञे विकृतानना। विभीषणश्च धर्मात्मा कैकस्याः पश्चिमः सुतः"।

**कैकेय** पु० केकयानां राजा अण् यादेरियादेशः। १केकयदेशनृपे केकयशब्दे उदाहरणादि। तस्यापत्यम् अण् ङीप्। २भरतमातरि स्त्री "कैकेयीशङ्कयेवाह पलितच्छद्मना जरा" "दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः "श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः" रघुः

**कैटज** पु० कुटज+पृषो०। कुटजवृक्षे भावप्रकाश इति शब्दकल्पद्रुमः भावप्रकाशे तु कुटजः कूटज इत्येव पाठः कूटजशब्दे दृश्यः

**कैटभ** पु० असुरभेदे तत्कथा हरिवं० ५२अ०
"अहमादौ पुराणेन संक्षिप्ता पद्मयोनिना। मांसं कृत्वा कृतौ पूर्वं मृण्मयौ द्वौ महासुरौ। कर्णस्रोतोभवौ द्वौ हि विष्णोरस्य महाबलौ। महार्णवे प्रस्वपतः काष्ठकुड्यसमौ स्थितौ। तौ विवेश स्वयं वायुर्ब्रह्मणा साधुचोदितः। तौ दिवं छादयन्तौ तु ववृधाते महासुरौ। वायुप्राणौ तु तौ दृष्ट्वा ब्रह्मा परिमृशच्छनैः। एकं मृदुतरं मेने कठिनं वेद चापरम्। नामनी तु तयोश्चक्रे सवितुः कमलोद्भवः। मृदुस्त्वयं मधुर्नाम कठिनः कैटभोऽभवत्। तौ दैत्यौ कृतनामानौ चेरतुर्बलदर्पितौ। सर्वमेकार्णवं लोकं योद्धुकामौ सुनिर्भयौ। तावागतौ समालोक्य ब्रह्मा लोकपितामहः। एकार्णवाम्बुनिचये तत्रैवान्तरधीयत। स पद्मे पद्मनाभस्य नाभिमध्यात् समुत्थिते। रोचयामास वसतिं गुह्यां ब्रह्मा चतुर्मुखः। तावुभौ जलगर्भस्थौ नारायणपितामहौ। बहून् वर्षगणानप्सु शयानौ न चकम्पतुः। अथ दीर्घस्य कालस्य तावुभौ मधुकैटभौ। आजग्मतुस्तमुद्देशं यत्र ब्रह्मा व्यवस्थितः। दृष्ट्वा तावसुरौ घोरौ महाकायौ दुरासदौ। ब्रह्मणा ताडितो विष्णुः पद्मनालेन वै पुरा। उत्पपाताशु शयनात् पद्मनाभो महाद्युतिः। तदा युद्धमभवद्घोरं तयोस्तस्य च वै तदा। एकार्णवे तदा लोके त्रैलोक्ये जलतां गते। तदाभूत्तुमुलं युद्धं वर्षसङ्ख्यासहस्रशः। न च तावसुरौ युद्धे तदा श्रममवापतुः। अथ दीर्घस्य कालस्य तौ दैत्यौ युद्धदुर्मदौ। ऊचतुः प्रीतमनसौ देवं नारायणं प्रभुम्। प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः। आवां जहि न यत्रोर्वी सलिलेन परिप्लुता। हतौ च तव पुत्रत्वं प्राप्नुयाव सुरोत्तम!। यो ह्यावां युधि निर्जेता तस्यावां विहितौ सुतौ। स तु गृह्य मृधे दोर्भ्यां दैत्यौ समपीडयत्। जग्मतुर्निधनञ्चापि तावुभौ मधुकैटभौ। तौ हतौ चाप्लुतौ तोये वपुर्भ्यामेकतां गतौ। मेदो मुमुचतुर्दैत्यौ मथ्यमानौ जलोर्मिभिः। मेदसा तज्जलं व्याप्तं ताभ्यामन्तर्दधे ततः। नारायणश्च भगवानसृजत् स पुनः प्रजाः। दैत्ययोर्मेदसा छन्ना मेदिनीति ततः स्मृता। प्रभावात् पद्मनाभस्य शाश्वती जगती कृता"।

**कैटभजित्** पु० कैटभं जितवान् जि—भूते क्विप्। विष्णौ अमरः तद्वधकथा च कैटभशब्दे उक्ता "उदमज्जि कैटभजितः शयनात्" कैटभद्विष् इत्यादयोऽप्यत्र "तनौ ममुस्तत्र न कैटभद्विषः" माघः १तं०। कैटभारि तत्रार्थे अमरः। कैटभशत्रु प्रभृतयोऽप्यत्र पु०

**कैटभी** स्त्री कैटभे कैटभनाशकाले स्तुत्या अण् ङीप्। महाकाल्याम् योगनिद्रायाम्। "यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुकैटभौ" महाकालीध्याने तदर्थं तस्याः स्तुतिरुक्ता। तत्स्तुतिश्च "योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते आस्तीर्य्य शेषशयनं कल्पान्ते भगवान्प्रभुरित्युपक्रम्य देवीमाहात्म्ये दर्शिता।

**कैटभेश्वरी** स्त्री "कैटभं निहतं कृत्वा गृहीता तत्पुरी यतः। तेन सा गीयते देवी पुराणे कैटभेश्वरीति देवीपु० ४५अ० उक्तनिरुक्तियुक्तायां दुर्गायाम्

**कैटर्य** पु० किट—त्रासे घञ् केटं राति अतितिक्तत्वात् रा+क स्वार्थे ष्यञ्। १भूनिम्बे, अमरः २कट्फले, रत्नमा० ३पूतिकरञ्जे ४मदनवृक्षे च राजनि०

**कैडर्य** पु० कैटर्य+पृषो०। कैटर्यशब्दार्थे राजनि०

**कैतव** न० कितवस्य भावः कर्म वा युवा० अण्। १शाठ्ये २द्यूते ३वैदूर्यमणौ राजनि०। स्वार्थे अण्। ४कितवे ५शठे ६द्यूतकारके ७धूर्त्ते च पु० "कैतवेनाक्षवत्यां वा युद्धे